# Dharmashasta Stotram

# ધર્મશાસ્તાસ્તોત્રમ્

## Document Information

Text title : dharmashAstAstotram

File name : dharmashAstAstotram.itx

Category : deities_misc, ayyappa, aShTaka

Location : doc_deities_misc

Acknowledge-Permission: Sringeri Math, Karnataka

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2022

*sanskritdocuments.org*

# Dharmashasta Stotram

## ધર્મશાસ્તાસ્તોત્રમ્

શ્રીભારતીતીર્થ-મહાસ્વામિવિરચિતં

જગત્પ્રતિષ્ઠાહેતુર્યઃ ધર્મઃ શ્રુત્યન્તકીર્તિતઃ ।
તસ્યાઽપિ શાસ્તા યો દેવઃ તં સદા સમુપાશ્રયે ॥ ૧॥

શ્રીશઙ્કરાર્યૈર્હિ શિવાવતારૈઃ
ધર્મપ્રચારાય સમસ્તકાલે ।
સુસ્થાપિતં શ‍ૃઙ્ગમહીધ્રવર્યે
પીઠં યતીન્દ્રાઃ પરિભૂષયન્તિ ॥ ૨॥

તેષ્વેવ કર્મન્દિવરેષુ વિદ્યા-
તપોધનેષુ પ્રથિતાનુભાવઃ ।
વિદ્યાસુતીર્થોઽભિનવોઽદ્ય યોગી
શાસ્તારમાલોકયિતું પ્રતસ્થે ॥ ૩॥

ધર્મસ્ય ગોપ્તા યતિપુઙ્ગવોઽયં
ધર્મસ્ય શાસ્તારમવૈક્ષતેતિ ।
યુક્તં તદેતદ્દ્ય્યુભયોસ્તયોર્હિ
સમ્મેલનં લોકહિતાય નૂનમ્ ॥ ૪॥

કાલેઽસ્મિન્ કલિમલદૂષિતેઽપિ ધર્મઃ
શ્રૌતોઽયં ન ખલુ વિલોપમાપ તત્ર ।
હેતુઃ ખલ્વયમિહ નૂનમેવ નાઽન્યઃ
શાસ્તાઽસ્તે સકલજનૈકવન્દ્યપાદઃ ॥ ૫॥

જ્ઞાનં ષડાસ્યવરતાતકૃપૈકલભ્યં
મોક્ષસ્તુ તાર્ક્ષ્યવરવાહદયૈકલભ્યઃ ।
જ્ઞાનં ચ મોક્ષ ઉભયં તુ વિના શ્રમેણ
પ્રાપ્યં જનૈઃ હરિહરાત્મજસત્પ્રસાદાત્ ॥ ૬॥

યમનિયમાદિસમેતૈઃ યતચિત્તૈર્યોગિભિઃ સદા ધ્યેયમ્ ।
શાસ્તારં હૃદિ કલયે ધાતારં સર્વલોકસ્ય ॥ ૭॥

શબરગિરિનિવાસઃ સર્વલોકૈકપૂજ્યઃ
    નતજનસુખકારી નમ્રહૃત્તાપહારી ।
ત્રિદશદિતિજસેવ્યઃ સ્વર્ગમોક્ષપ્રદાતા
    હરિહરસુતદેવઃ સન્તતં શં તનોતુ ॥ ૮॥

ઇતિ દક્ષિણામ્નાય-શ્રી-શ‍ૃઙ્ગેરી-શારદા-પીઠાધીશ્વર-
જગદ્ગુરુશઙ્કરાચાર્ય-અનન્તશ્રીવિભૂષિત-શ્રીભારતીતીર્થ-
મહાસ્વામિવિરચિત-ધર્મશાસ્તા-સ્તોત્રં સમ્પૂર્ણમ્ ।

*Dharmashasta Stotram*

pdf was typeset on September 18, 2022

Please send corrections to *sanskrit@cheerful.com*